International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 14-16
© 2020 IJSR
www.anantaajournal.com
Received: 10-05-2020
Accepted: 12-06-2020

Dr. Ashok Kumar Varma K
MBBS, MD, (PGIChandigar)
FRSH (LONDON)
Ph.D. Scholar, RSVP, Tirupati,
Andhra Pradesh, India

Corresponding Author:
Dr. Ashok Kumar Varma K
MBBS, MD, (PGIChandigar)
FRSH (LONDON)
Ph.D. Scholar, RSVP, Tirupati,
Andhra Pradesh, India

पञ्चदशी अनुसारेण अद्वैतवेदान्ते प्रमेयविचारः

Dr. Ashok Kumar Varma K

प्रस्तावना

"प्रमेयं बहुधा लोके प्राहुः प्रभाकरादयः " इत्यभियुक्तोक्तेः तत्तदर्शनकाराणां मतानुसारेण स्वस्वदर्शनसिद्धान्त ज्ञानोपयोगितया प्रमेयाः पञ्च,षट्,सप्त,षोडश,पञ्चविशत्यादि संख्या भेदेन परिकल्पिताः वर्तन्ते ।

अद्वैतसिद्धानतानुसारेण पदार्थद्वयमेवागीक्रियते दृक् दृश्य भेदेन । तत्र दृक्पदार्थः आत्मा पारमार्थकः एक एव । आत्मव्यतिरिक्तः अविद्या तथा तया अविद्ययाव्याप्तं च यदविद्याकार्यं एतदुभयात्मकः प्रपञ्चः दृश्यपदार्थः ।

यद्यपि अद्वैतवेदान्तनये प्रपञ्चस्य कृत्स्नस्य आविद्यकत्वेन स्वाप्निकपदार्थ तुल्यत्वात् तन्निरूपणं व्यर्थमेव भवति । तथापि सत्तात्रैविध्याङ्गीकर्तृभिः वेदान्तिभिः पारमार्थिक ब्रह्मसत्तायाः, शुक्तिरजतादि प्रातिभासिकसत्तायाः अतिरिक्ता व्यावहारिकी सत्ता प्रपञ्चस्याङ्गीक्रियते । प्रातिभासिकस्य व्यवहारे नोपयोगः शुक्तिरजतेन अङ्गुलीयादिकं कर्तुमशक्यत्वात्। एवं पारमार्थिक आत्मैक्य रूपेणावस्थितौ तदानीं व्यावहारिकस्योपयोगः नास्ति चेदपि ततः पूर्वं उपासनादि व्यवहार दशायां व्यावहारिकस्य उपयोगः समस्त्येव । वेदान्तेषु उपासना विहिता वर्तते । उपासना हि भेदगर्भा । उपास्योपासकभावादीनत्वात् । अतः दृश्यपदार्थनिरूपणमावशयकम् ।

एवं व्यहारिकसत्तात्मकः प्रपञ्चरूपः दृश्यपदार्थः त्रिविधः अव्याकृतमूर्त अमूर्तभेदात् ।

अव्याकृतप्रपञ्चः

अविद्या, तस्याश्चिता सह संबन्धः, जीवेश्वरविभागः, अविद्यागत चिदाभासः चेति पदार्थ चतुष्टयमवयाकृत शब्देनोच्यते । अविद्यानाम काचित् ईश्वरशक्तिः । तस्याश्च जडत्वेऽपि स्वरूपतः स्वच्छत्वात् तत्रप्रतिफलिता या चित् आभासः इत्युच्यते । अयं च चिदाभासः न चिदेवेति न दृग्रूपे प्रथमपदार्थे अन्तर्भावः । साभासाविद्या अव्याकृतनामाभिधा मूर्तामूर्त प्रपञ्चबीजशक्तिरूपा । इममव्याकृत पदर्थमुद्दिश्योक्तं पञ्चदश्यां---

> चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।
> तमोरजः सत्त्वगुणा प्रकृतिर्द्विविधा च सा ।।(पञ्च १.१५.)
> अमूर्तप्रपञ्चः

अयं पूर्वोक्तः अव्याकृतपदार्थः अमूर्तप्रपञ्चकारणभूतः इत्युक्तम् । स अवयक्तपदार्थः स्वयं जडोऽपि प्रतिफलितचिदाभासेनोज्वलिता शब्दस्पर्शरूपरसगन्धात्मकानि आकाशादि पञ्चमहाभूतानि (अपञ्चीकृतानि) जनयति । तानि च सत्वरजस्तमो गुणात्मकानि ।

सत्वांश प्राधान्येन ज्ञान क्रियाशक्तयात्मकमेकं स्वच्छं द्रव्यं मिलित्वा जनयन्ति । तद्द्रव्यं ज्ञानशक्तिप्रधानं अन्तःकरणाथ्यं बुधिः, मनः इति द्विधोच्यते । क्रियाशक्ति प्रधान्येन प्राणः इत्युच्यते ।

एवं प्रत्येकेभ्यः महाभूतेभ्यः सत्वांशात् आकाशादिक्रमेण श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियायणि, तथा रजोंऽशात् वाक्पाणिपादपायुपस्थाख्यानि पञ्च कर्मेन्द्रियाणि च उत्पद्यन्ते । एतेच्च सर्वं मिलित्वा सप्तदशकं लिङ्गं ज्ञानशक्तिप्राधान्येन हिरण्यगर्भ इति, क्रियाशक्ति प्राधान्येन सूत्रात्मेति चोच्यते ।

मूर्तप्रपञ्चः

अमूर्तानि (सूक्ष्माणि) भोगायतनं शरीरं भोग्यान् विषयाश्च विना भोगं जनयितुं असमर्थानि भवन्ति । अतः पञ्चीकरण प्रक्रियया स्थूलानि भवन्ति । पञ्चीकृतानि पञ्चभूतानि मूर्ताख्यानि मिलित्वा इन्द्रियाणामधिष्ठानं भोगायतनमुत्पादयन्ति । तदेव शरीरमित्युच्यते । तच्च जरायुजादिभेदेन चतुर्विधं भवति । एवं विषया अपि पञ्चीकृतएकैकभूतजन्याः चतुर्दशभुवनाख्या तदन्तर्गतघटपटादयश्च। एतच्च सर्वं ब्रह्माण्डाख्यं विराडिति मूर्तमिति चोच्यते । अस्य विचारः पञ्चदश्यां एवमभिवर्णितः ---

तद्भोगाय पुनर्भोग्यभोगायतनजन्मने ।
पञ्चीकरोति भगवान्प्रत्येकं वियदादिकम् ।। (पञ्च.१.२६.)
द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ।। (पञ्च.१.२७.)
तैरण्डस्तत्र भुवनं भोग्यभोगाश्रयोद्भवः ।
हिरण्यगर्भः स्थुलेऽस्मिन्देहे वैश्वानरो भवेत् ।। (पञ्च.१.२८.) इति

एवं दृश्यपदार्थः संग्रहतया निरूपितः अपरमार्थिकोऽपि व्यावहारिकसत्यः इति उपासनादि उपयोगर्थम् इति स्मर्तव्यम् ।

अधुना दृक्पदार्थः निरूप्यते । दृक्पदार्थः आत्मा पारमार्थिकः । एक एव इति पूर्वमुक्तम् । यद्यपि दृक्रूप आत्मा एक एव सर्वदा एकरूपोऽपि आपादिकभेदेन विधः भवति । त्रि ईशवरः,जीवः,साक्षी इति ।

ईश्वरः, जीवः

मायां चित्प्रतिबिम्बः ईश्वरः, अविद्यायां चित्प्रतिबिम्बः जीवः इति । माया अविद्यायोः भेदस्तु प्रकटार्थकारमतानुसरेण माया आवरणविक्षेपशक्ति रहिता भवति । अविद्यातु आवरणवक्षैपशक्तिमती इति । एकस्या एव प्रदेश प्रदेशि भावेन । विद्यारण्यस्वामिनः पञ्चदश्यां ---

चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता ।
तमोरजः सत्त्वगुणा प्रकृतिर्द्विविधा च सा ।। (पञ्च.१.१५.)
सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ।
मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ।। (पञ्च.१.६.)
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा। सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् ।। (पञ्च.१.१७)

इति वदन्तः शुद्धसत्वप्रधाना मूलप्रकृतिः माया, मलिनसत्वप्रधाना अविद्या इति । मायाऽविद्या भेदं परिकल्प्य मायाप्रतिबिम्बः ईश्वरः अविध्याप्रतिबिम्बः जीव इति वदन्ति । अन्यश्च पञ्चदश्यां जीवेशविभाग विषये प्रकारः दर्शितः । चित्रदीपप्रकरणे । तथाहि---

कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा ।
घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ।। (पञ्च.6.18.)
घटावच्छिन्नखे नीरं यत्तत्रप्रतिबिम्बितः ।
साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते ।। (पञ्च.6.19.)
महाकाशस्य मध्ये यन्मेघमण्डलमीक्ष्यते ।
प्रतिबिम्बतया तत्र मेघाकाशो जले स्थितः ।। (पञ्च.6.20.)
मेघांशरूपमुदकं तुषाराकारसंस्थितम् ।
तत्र खप्रतिबिम्बोऽयं नीरत्वादनुमीयते ।। (पञ्च.6.21.)
अधिष्ठानतया देहद्वयावच्छिन्नचेतनः ।
कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ।। (पञ्च.6.22)
कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः ।
प्राणानां धारणाज्जीवः संसारेण स युज्यते ।। (पञ्च.6.23.)
जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः ।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते ।। (पञ्च.6.24)
अयं जीवो न कूटस्थं विविनक्ति कदाचन ।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम् ।। (पञ्च.6.25.)

यथा घटावच्छिन्नाकाशो घटाकाशः तदाश्रिते जले प्रतिबिम्बितः साभ्रनक्षत्रो जलाकाशः अनवच्छिन्नो महाकाशः, महाकाशमध्यवर्तिनि मेघमण्डले वृष्टिलक्षण कार्यानुमेयेषु जलरूप तद् अवयवेषु तुषाराकारेषु प्रतिबिम्बितः मेघाकाशः इति वस्तुतः एकस्यापि आकाशस्य चातुर्विध्यं, तथा स्थूलसूक्ष्मदेहद्वयस्य

अधिष्ठानतया वर्तमानं स्थितंतदवच्छिन्नं चैतन्यं कूटवत् निर्विकारत्वेन स्थितं कूटस्थम् इत्युच्यते । तत्र कल्पिते अन्तःकरणे प्रतिबिम्बितं चैतन्यं संसारयोगी जीवः इत्युच्यते। अनवच्छिन्नं चैतन्यं ब्रह्म । तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिबिम्बितं चैतन्यं ईश्वरः इति । चैतन्यस्य चातुर्मिध्यं परिकल्प्य अन्तःकरण धीवासनोपरत्क अज्ञानोपाधि भेदेन जीवेश्वर विभागं प्रदर्शयन्ति विद्यारण्यस्वामिनः ।

साक्षी

विद्यारण्य स्वामिनः पञ्चदश्यां कूटस्थदीपं नाटकदीपञ्चावलम्ब्य साक्षिणं निरूपयन्ति । पञ्चीकृताऽपञ्चीकृत भूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्य अविद्या कल्पितस्य आधारतया वर्तमानत्वेन ताभ्यामनवच्छिन्न आत्मा कूटस्थः इत्युच्यते । एता- दृशः कूटस्थः स्वावचछेदकस्य देहद्वयस्य साक्षादीक्षणात् निर्विकारत्वाच्च साक्षीत्युच्यते । इति ।
अयमेवविषयः

> खादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् ।
> कूटस्थभासितो देहो धीस्थजीवेन भास्यते ।। (पञ्च.8.1.)

इत्यादिना कूटस्थदीपे प्रपञ्चितः । नाटकदीपेऽपि नृत्यशालादीप दृष्टान्तेन साक्षी जीवाद्विविच्य पिरदर्शितः। तदाहि---

> कर्तारं च क्रियां तद्वद्यावृत्तविषयानपि ।
> स्फोरयेदेकयत्नेन योऽसौ साक्ष्यत्र चिद्वपुः ।। (पञ्च.10.9.)

इति साक्षिस्वरूपं निरूप्य

> नृत्यशालास्थितो जीपः प्रभुं सभ्यांश्च नर्तकीम् ।
> दीपयेदविशेषेण तदभावेऽपि दीप्यते ।। (पञ्च.10,11)
> अहंकारं धियं साक्षी विषयानपि भासयेत् ।
> अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववत् ।। (पञ्च.10.12.)
> निरन्तरं भासमाने कुटस्थे ज्ञप्तिरूपतः ।
> तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा ।। (पञ्च.10.13.)
> अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः ।
> तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः ।। (पञ्च.10.14.)

यथा चिदाभास विशिष्टाऽहंकाररूपं जीवं विषयोपभोग साकल्यवैकल्याभिमान प्रयुक्त हर्षविषादवत्वात् नृत्याभिमानिप्रभुतुल्यं तत्परिसरवर्तित्वेऽपि तद्राहित्यात् सभ्यपुरुषतुल्यात्, विषयान् नानाविधविकारवत्वात् नर्तकीतुल्यां धियं च दीपयन् सुषुप्त्यादावहंकाराद्यभावेऽपि दीप्यमानः चिदाभासविशिष्टः चिदाभासविशिष्टाहंकार रूप जीवभ्रमाधिष्ठान कूटस्थचैतन्यात्मा साक्षीति । एवं यथामति पञ्चदशी अनुसारेण वेदान्तप्रमेयः दृक्दृश्यरूपः विवेचितः ।

संदर्भ

1. अव्याकृतप्रपञ्चः पञ्चदशी
   तत्तवविवेकप्रकरणम्---१.१५, १.२६, १.२७, १.२८
2. ईश्वरः जीवः पञ्चदशी
   तत्त्वविवेकप्रकरणम्---१.१५, १.६, १.१७,
   चित्रदीपप्रकरणम्---६.१८, ६.१९, ६.२०, ६.२१, २२, २३, २४, २५
3. साक्षी पञ्चदशी
   कूटस्थदीपप्रकरणम्---७.१
   नाटकदीपप्रकरणम्---१०.९, ११, १२, १३, १४